श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीरामसत्कवि प्रणीतम्

# ॥ श्रीनृसिंहस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनृसिंहस्तोत्रम् ॥

श्रीरमाकुचाग्रभासिकुङ्कुमाङ्कितोरसं
    तापनाङ्घ्रिसारसं सदादयासुधारसम्।
कुन्दशुभ्रशारदारविन्दचन्द्रसुन्दरं
    सिंहशैलमन्दिरं नृसिंहदेवमाश्रये ॥ 1 ॥

पापपाशमोचनं विरोचनेन्दुलोचनं
    फाललोचनादिदेवसन्नुतं महोन्नतम्।
शेषतल्पशायिनं मनोरथप्रदायिनं
    सिंहशैलमन्दिरं नृसिंहदेवमाश्रये ॥ 2 ॥

सञ्चरस्सटाजटाभिरुन्नमेघमण्डलं
    भैरवारवाटहासभेदिदामिहोदरम्।
दीनलोकसादरं धराभरं जटाधरं
    सिंहशैलमन्दिरं नृसिंहदेवमाश्रये ॥ 3 ॥

शाकिनीपिशाचिघोरढाकिनीभयङ्करं
    ब्रह्मराक्षसव्यथा क्षयङ्करं शिवङ्करम्।
देवतासुहृत्तमं दिवाकरं सुधाकरं
    सिंहशैलमन्दिरं नृसिंहदेवमाश्रये ॥ 4 ॥

मत्स्यकूर्मक्रोडनारसिंहवामनाकृतिं
    भार्गवं रघूद्वहं प्रलम्भगर्पुरापहम्।
बुद्धकल्किविग्रहं जगद्विरोधिनिग्रहं
    सिंहशैलमन्दिरं नृसिंहदेवमाश्रये ॥ 5 ॥

धारुणी वधूमणी गृहीतपादपल्लवं
नन्दगोष्ट्रवल्लवीसतीमनोज्ञवल्लभम्।
मायिनां विशारदं भवाम्बुराशिपारदं
सिंहशैलमन्दिरं नृसिंहदेवमाश्रये॥ 6॥

मोहतापहारिणं गदारथाङ्गधारिणं
श्रीमनोविहारिणं विदेहजोर्निवारिणम्।
दानवेन्द्रवैरिणं तपोधनेष्टकारिणं
सिंहशैलमन्दिरं नृसिंहदेवमाश्रये॥ 7॥

रामसत्कविप्रणीतमेतदष्टका शिवं
देवसारसङ्ग्रहं महोग्रपातकान्तकम्।
जल्पितां निरन्तरं समस्तकामपूरकं
सिंहशैलमन्दिरं नृसिंहदेवमाश्रये॥ 8॥

॥ इति श्रीनृसिंहस्तोत्रं समाप्तम्॥